**दिनाङ्क :- 08.12.2025**

**प्रात: - 06:55**

**वंदे मातरम् चर्चा**

वंदे मातरम् इति राष्ट्रगीतस्य पंचाशतधिकैकशततम-वार्षिकोत्सवस्य विशिष्ट-चर्चा अद्य लोकसभायां आरभेत। आधिकारिकस्रोतानां अनुसारं, प्रधानमन्त्री नरेन्द्रमोदी लोकसभायां उपवेशनस्य आरम्भो विधास्यति। गतसप्ताहे वार्ताहरान् सम्बोधयन् संसदीयकार्यमन्त्री किरेन रिजिजुः अवोचत् यत् पूर्णदिवसस्य चर्चा मध्याह्ने द्वादश वादने आरप्स्यते इति। लोकसभाध्यक्षस्य ओम बिरला वर्यस्य अध्यक्षतायां सर्वदलीयसभायां निर्णयो विहित: यत् अष्ट दिनाङ्के वंदे मातरम् इति विषये चर्चा भविष्यति, दिसम्बर मासस्य नव दिनाङ्के निर्वाचन- परिष्कार-विषये च चर्चा भविष्यति।

**कल्कत्ता- गीता**

कल्कत्तानगरे ह्यः पञ्चलक्षस्वैरः सह सामूहिक-गीता-पाठः आयोजितः आसीत्। सनातन-संस्कृति-संसदा आयोजितः मुख्यः कार्यक्रमः ब्रिगेड् परेड्-ग्रौण्ड् इत्यत्र औपचारिक-दीपप्रज्वलनेन आरभत। गीता-पाठात् पूर्वं वैदिक-कीर्तन-सत्रस्य आयोजनं कृतम् आसीत्। तदनन्तरं भक्तिगीतं शोभायात्रा च अभवत्, तदनन्तरं गीता मञ्चे संस्थापिता, आरती च कृता। विभिन्नानां साधूनां आध्यात्मिकनेतृणां च भाषणानन्तरं गीता-पाठः आरब्धः। प्रथमः, नवमः, अष्टादशतम: अध्यायः एकस्वरेण पठिताः। पश्चिमबङ्गालराज्यस्य राज्यपालः सी. वी. आनन्दबोसः अस्मिन् कार्यक्रमे उपस्थितः आसीत्। केन्द्रीय-राज्यमन्त्री सुकान्त-मजूमदारः, विपक्षस्य नेता सुवेन्दु अधिकारी, राज्य-भाजपा-अध्यक्षः शमिक भट्टाचार्यः, देशस्य विभिन्नेभ्यः भागेभ्यः आगता: साधव: च अस्मिन् कार्यक्रमे सोत्साहं भागम् अगृह्णन्।

**महाराष्ट्रविधानसभायाः**

महाराष्ट्रविधानसभायाः शीतकालीनसम्मेलनस्य आरम्भः अद्य नागपुरे भविष्यति। अस्य मासस्य चतुर्दश दिनाङ्कपर्यन्तं सत्रं भविष्यति। प्रथमदिवसे अनुपूरक-याचनाः प्रस्तूयन्ते। अस्मिन् सत्रे कृषिसम्बद्धान् सर्वान् विषयान् चर्चयितुं सर्वकारः सज्जः अस्ति अपि च आहत्य अष्टादश विधेयकाः सभायां प्रस्तूयन्ते इति मुख्यमन्त्री देवेन्द्र-फड्नविस्-वर्यः सूचितवान्।

**गोवा**

गोवा सर्वकार: अर्पोरा-नगरे अग्नि दुर्घटनायां, यत्र पंचविंशति: जनाः मृत्युमुपगता: तस्या: दुर्घटनाया: द्रुतं दक्षं च निरीक्षणार्थं उक्तवान्। अर्पोरा-नगरस्य बार्देज़्-तालुका इत्यत्र एकस्यां गोष्ठ्यां महत् अग्निप्रकोपः अभवत्, येन पंचविंशति: जनाः मृत्युमुपगता: , अन्ये च अनेके व्रणिताः अभवन्, येन स्थानीय-अधिकारिणः तत्क्षणमेव कार्यम् अकुर्वन्। अग्निः प्रकोपस्य कारणं सम्प्रति अपि अज्ञातम् अस्ति। घटनायाः द्रुतं दक्षं च निरीक्षणार्थं नियन्त्रण-कक्षानां स्थापना कृता अस्ति।

**ऋतु विज्ञान-विभागेन**

भारतस्य ऋतु विज्ञान-विभागेन अद्य छत्तीसगढस्य, मध्यप्रदेशस्य, ओडिशा-राज्यस्य, विदर्भस्य च केषुचित् भागेषु शैत्यतरङ्गस्य पूर्वानुमानं प्रकटितम्। अण्डमान्-निकोबार्-द्वीपेषु, तमिल्नाडु-पुदुचेरी-करैकल्-द्वीपेषु च मेघावृष्टेः, आकाशीय विद्युतस्य च सम्भावना अस्ति।

**पुरुष-हाकी-क्रीडायां**

पुरुष-हाकी-क्रीडायां केप्-टौन्-नगरे त्रि-क्रीडा-शृङ्खलायाः प्रथमायां स्पर्धायां भारतं आतिथेय-दक्षिण-आफ्रिका दलं पंच - द्वि अङ्कैः पराजयत। द्वितीय-हाकी-टेस्ट्-क्रीडा अद्य भारतीय समयानुगुणं सायं सार्ध अष्ट वादने केप्-टौन्-नगरस्य हार्ट्लेवेल्-क्रीडाङ्गणे भविष्यति।

॥ इति वार्ता:॥